This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलबुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M-2616 विषय —

नाव येकादसी महात्म

लेखक/लिपीकार

पृठ 52 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2616

॥ऐकादसिमाहमप्रारंभ॥ E

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशीपत्र
१

॥ श्रीगणेशाय नमः॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देविं सरस्वतिं व्यासं ततो जयमुदीरयेत्॥१
युधिष्ठिर उ॰॥ श्रीकृष्ण सर्वमेवेदं त्वत्तो ज्ञानस्य विस्तरं। पितामहाच्च गांगेयात् श्रुत्वा तस्मिंश्च नारदात्॥२
परमेकं द्विजश्रेष्ठ विविधं श्रुश्रुतं मया पि। श्रष्टुकामास्मि यच्छ्रेष्ठं सर्वपापप्रणाशनं।३। तच्छु हि रूपया मम सवि
धिमंत्रपुरःसरं। एकादशीव्रतं तस्य कथमुद्यापनं तु वेद॥४॥ मार्कंडेय उ॰॥ साधु पृष्ट महाभाग धर्मपुत्र यु
धिष्ठिरः। यत्तेन शृणु तत्सर्वमेकादश्याव्रतं शुभं।५। उद्यापनं च विधिवत् सर्वाशुभविनाशनं। यथोक्तं
वै मया कापि कथयिष्येत वानघ।६। नरेंद्रं ज्येष्ठ पांडव कुरु विवेक परेशु वै। वक्तव्यं कापि नृपालस्य शिष्ये
श्रुयदिष्यते।७। पुराकृतयुगस्यादौ युवनाश्वो महानृपः। तस्य पुत्रो महात्मा गोमांधाता जगदीश्वरः।८। वि
ष्णुभक्ति स्तुतिपरः प्रवरश्च महीपतेः। पंचाशत्कोटि विस्तारा वसुधा वसुधाधिपः।९। तत्कारस्ते नारिवंताधिपाः
प्रसादात्कमलापते। सराजा मृगयामिच्छन्परे संस्थाप्य मंत्रिणं।१०। स वैरिस्तु चरैः सार्द्धं जगाम गहनं वनं॥
मत्तत्र मृगसंगेन प्रापतत् च वनांत्तनं॥११॥ पद्मपर्णसमरितोरमंना नानाद्विजमृगान्वितं। नानाद्रुमलताकीर्णं
नानासिद्धिव्यापरशोभितं।१२। तस्मिन्नकौ च वने पुण्ये गंगातीरे मनोरमे। तिष्ठति मुनयः सर्वे योगध्यानपरायणाः।
उर्वसाश्च वामदेवो नाचिकेतो घगौतमः। विश्वामित्रो वसिष्ठश्च गालुकि गालवस्तथा।१४। जमदग्निश्च कोरा

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्पया ऌवल्क्यो विभांडुकः। एते मुनिगणैः सार्द्धमहंति प्रामि पांडवः॥ १५॥ ततो राजा ह्यं यत्पत्का वसुधासमवस्थितः॥
महर्षिणां च सर्वेषां घ्रणमसकरो नृपः॥ १६॥ ततो मुनिगणैः सार्द्धैरर्घ्यार्घैरुपपूजितः॥ कृतांजलिपुटो भूत्वा धर्म
पप्रच्छ वै पुनः॥ १७॥ ततो वार्त्ताप्रसंगेन सर्वानुमतमाश्रितं॥ मयाख्यातं ह्ययं तस्य तच्छृणुष्व नराधिपः॥ १८॥ सर्वेषां वि
ष्णुधर्माणां मूलमेकादशी व्रतं॥ एकादशी परं नास्ति कृत्वाय शसहस्रकं॥ १९॥ तावद्व्रतानि सर्वाणि दानानि कुरुनंद
नः॥ यावन्नोपवसेज्जंतु वासरं विष्णुवल्लभं॥ २०॥ कंरं चांडालजातिनां एकादश्युपवासकृत॥ न च भूज्या च चतुर्वेदी
यो भुंक्ते हरिवासरे॥ २१॥ न गायत्री समो मंत्रं न पर्वद्वादशी परं व्रतमेकादशी पुण्ये सर्वारिष्टविनाशने॥ २२॥ एकभक्ते
न नक्तेन तु उपवासैर्विशेषतः॥ कुरुक्षेत्र पराशर्स्थल पवित्रं द्वादशी व्रतं॥ २३॥ मांधातोवाच॥ एकभक्तस्य नक्तस्य तु उपवा
सस्य मे प्रभो॥ किं फलं किं प्रमाणं हि को विधि किं च भोजनं॥ २४॥ एतन्मे सर्वं विशेषेण कथयस्व महामुने॥ मार्कंडेय उ०॥
उपवासार्द्ध पुण्यं हि नक्तभोजि समाप्नुयात॥ २५॥ नक्तस्यार्द्ध भवेत् पुण्यमेकभक्तस्य कारके॥ एकभक्तेन नक्तेन नोप
वासे विशेषतः॥ २६॥ यः करोति नरो भक्त्या नाहमिति स्वस्ति वैष्णवः॥ हेमंते चैव संप्राप्ते मासे मार्गशिरस्थिते॥ २७॥ शुक्ल
पक्षे च या राजन् तस्मै पोष्या कादशी शुभा॥ दशम्यां चैव नक्तं च यतिको विनतु दृढव्रतः॥ २८॥ द्वादश्यामेकभक्तं तु
एकादश्यामुपोषणं॥ एकादशी दिने प्राप्ते प्रातरुत्थाय सुव्रते॥ २९॥ गृहीत्वा नियमं तत्र दंतधावनपूर्वकं॥ कांस
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांसं मसुराश्च चणएकाकोद्रवास्तथा॥३०॥ शाकं मधुपरान्नं च पुनर्भोजिनमैथुनं। एकादश्यांपादतकाष्टैतैलस्नानं च।
भोजनं।३१। दिवास्वापं च सतत्यं च तांबूलं भोगवर्जितं॥ असरुज्जलपानं च हिंसा द्युततथाजनं।३२। एकादश्यां
महाराजष्टकायान्नियमास्तथा। अद्य मे भोजनं नास्ति स्त्रीसेवा वा पिके शवः।३३। श्रीतायत्तव देवेश। नियमास्तु दिवा
निशं। स्वप्ने न्द्रियस्तु विकलं भोजनं यश्च मैथुनं।३४। दंतांतरविलग्नानां क्षमस्व परमेश्वरः। एकादश्यां निराहारः स्थि
त्वा चैव परे हनि।३५। भोक्ष्ये हं पुंडरीकाक्ष शरणं मे भवाच्युतः॥ नियममंत्रः॥ स्नानं कृत्वा विधानेन नद्यादौ विमले
जले।३६। तर्पयित्वा पितॄन् देवान् पूजयेत् मधुसूदनं॥ स्नात्वा दिनांते कृतनित्यकर्म रात्रौ च विष्णुं विविधोपचा
रैः। शंखार्घनैवेद्यनिवेदनैश्च नीराजनैर्जागरणैश्च दीपैः।३८। गोमयं मंडलं कृत्वा चतुर्हस्तप्रमाणतः॥
स्थापयेत्ताम्रजं कुंभं पंचरत्नसमन्वितं।३९।। तस्योपरि न्यसेद्देवं जलशय्यासु जगत्पतिं। पृथक् जलं पृथक् पुष्पं
मासे मासे पृथक्।४०। मार्गशीर्षे सितेपक्षे हरिरेकादशी प्रिया॥ जयंति नाम विख्याता सर्वपापप्रणाशनी।४१। २
केशवं स्थापयेद्देवं। विशालाक्षासमन्वितं। पूजयेन्मालतीपुष्पैर्नैवेद्यं मोदकामतं॥४२॥ नारिंगेन ददेदर्घं सप्त
धान्यं प्रदीयते। रूपं पक्षे च विख्याता विमलैकादशी भुवि।४३। न्यसेत्संकर्षणं देवं सहितं च सुनंदया॥ पूजयेत्
विमलैः पुष्पैः श्रृणुराजन्नगस्त्यकैः।४४। रंभाफलेन चैवार्घं॥ नैवेद्यं गणा॥ कासमतः सुवर्णं दीयते दानं द्विजेभ्यो नृपस
त्तमः॥

पौषस्यैकादशीसु क्ता मानंदा नाम नृपते। न्यसेन्नारायणं देवं लक्ष्म्या चैव समन्वितं।४७। स्रजयेत्पद्मपुष्पेश्च
दाडिमं चार्घमुत्तमं। चूर्णमुक्तं तु नैवेद्यं रूप्यपात्रं प्रदीयते।४८। कल्याणरूपमपत्न्यैवन्यसेद्देवं हरिस्तुतं। सहि
तं श्रीति प्रियया कक्कारेण प्रस्रजयेत्।४९। दद्देद्दर्घस्थनाप्यास्यानेवेद्यं घेवरं वरं। दानानि दीयते उग्रं द्विजेभ्यो
यपुंगवः।४९। माघकामप्रदा सुक्ते पक्षे माधव देवता। रुक्मिण्यासहितो देवक बकोरस्रजयेन्सनेः।५०। बीज
पुरं द्ददेदर्घं नैवेद्यं मंडका तथा। द्विजाय तिलधेनुं वै कपितं दानमुत्तमं।५१। एकादशी जया रूपेत्रसुतं पुजयेत
सुरं। धात्र्या च सहितं देव्या स्रजयेत् तुलसी दलैः। सो हालिकां च नैवेद्यं जंबीरेणार्घमुत्तमं। उपानो दीयते दानं द्विजा
यविष्णुवत्सलः।५३। फाल्गुने कादशीसुक्ता साधात्री नाम नृपते। गोविंदं स्रजयेद्देवं चन्द्रकांत्या समन्वितं।५४।स्र
जयेच्चंपके पुष्पैरषोडे नार्घमुत्तमं। कंसारकं च नैवेद्यं तीलपात्रं प्रदीयते।५५। सौम्या चैकादशी कृष्णे त्रिनिरुद्धं प्रस्रज
येत्। सहितं मित्रविंदाया कुसुमेश्च वकुंदकैः।५६। अर्घं वै वा न्नतिदद्या नैवेद्यं सेवकांस्तथा। तिलधेनुं दीयदानं
विप्राय विष्णुरूपिणे।५७। चैत्रे च दमना नाम विख्याते कादशी नृप। विष्णुं संस्रजयेद्देवं विशालाक्षसमन्वितं।५८।स्र
जयेच्चुतपुष्पैस्तु चर्जटेनार्घमुत्तमं। नैवेद्यं सक्तुकं दानं कर्पूरागरुचंदनं।५९। बल्लालाक्षमपत्न्यैव वासुदेवं सुरं
नृप। शांत्यया सहितं देव्या मरुपुष्पैस्तु स्रजयेत्।६०। अर्घं मातिफलं चैव नैवेद्यं वटकानि च। दीयते वस्त्रयुग्मं च॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३

द्विजाय विष्णुरूपिणे॥६१॥ एकादशी नरःश्रेष्ठ वैशाखे मधुसूदनि॥ मधुसूदनदेवं च माधव्या च समन्वितं॥६२॥ पूजयेद्द
मनकैः पुष्पैः अर्घं तु पनसस्मृतं॥ उपानयुगं उदानं पायसं शर्करान्वितं॥६३॥ सिता चैकादशी ज्येष्ठे प्रद्युम्नं देवम
र्चयेत्॥ कालिंद्यासहितं देव्या अर्घं चूतफलं नृप॥६४॥ नैवेद्यं कथितं उग्धं गोदानं द्विजसुनवे॥ ज्येष्ठे त्रिविक्रमा
श्च कृष्णे देवं त्रिविक्रमं नृपः॥६५॥ पूजयेद्यूथिकापुष्पैः पद्माख्यान्नसमन्वितं॥ करणेन दद्देदर्घं नैवेद्यं घृतशालिनं॥
६६॥ दानं च दीयते छत्रं द्विजाय नररूपिणे॥ एकादशी कृष्णपक्षे विख्याता पापनाशनि॥ नृसिंहं स्थापयेद्देवं स्वो
मकान्त्या समन्वितं॥ पूजयेन्नगराजैश्च अर्घं आम्रफलं स्मृतं॥६७॥ करवकैश्च नैवेद्यं जलधेनुं द्विजाय च॥ एका
एकादशी शुक्लपक्षे तेषां देसुगतिप्रदाः॥६८॥ पूजयेद्वामनं देवं कमलाया समन्वितं॥ नालिकेरं ददेदर्घं आपा
मार्गेण पूजयेत्॥७०॥ खंडमिकाच नैवेद्यं॥ भूमीछत्रं च दीयते॥ एकादशी च विख्याता ह्यसिते वारिनाशनि॥७१
सहितं विजया देव्या पूजयेत्पुरुषोत्तमं॥ सुगंधैर्वकुलैः पुष्पैः अर्घं बिल्वफलं स्मृतं॥७२॥ नैवेद्यं सूपकैः कार्यं नवनी
तं च दीयते॥ श्रावणस्य सितपक्षे पलितैकादशी नृपः॥ श्रीधरं स्थापयेद्देवं कांतिमध्या समन्वितं॥ पूजयेच्च त
ैश्च अर्घं पनसकं वरं॥७४॥ नैवेद्यं पोलिकाश्रेष्ठा पुस्तकं दीयते नघः॥ धर्मप्रदा निधा कृष्णे॥ धोत्तमे पूजयेत्सुरं
७५॥ रुक्मिण्या सहितं नृप पुष्पैः पाटलजैर्वरैः॥ अर्घं पुंगिफलं नित्यं नैवेद्यं हरिकामता॥७६॥ दीयते घृतपात्रं तु॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधायविष्णुरूपिणे।एकादशीमाऽपदेश्रुकेचहरिवल्लभा।७७।स्थापयेच्चरूपिकेशंअपराजितयासह।पूजये
त्कांशपुष्पैश्चकूष्मांडेनार्घमुत्तमं।७८।तिलद्रोदंचनैवेद्यंदानंवस्त्रमुपरिचतां।रोज्ञाचैकादशीरूपेजेन
दैनवपूजयेत।७९।देवसुन्नगयासार्द्धंउर्वीकरवरेचतो।।शिवाफलंदेदेद्घंनैवेद्यंरवंडमंडका।८०।विधि
वद्दीयतेकन्यास्वजातीयवननो।एकादशीविशोकानत्तस्मिन्नेनच्यितासिता।८१।स्थापयेत्पद्मनाभंउपभवता
समन्वितं।पूजयेज्जशमीपुष्पैअर्घंमदनजंफलं।८२।शालिपिष्टेननैवेद्यंशर्करासहितेनवै।दीयतेमोदकान्नूप
गुडेनसर्पिषान्वितः।८३।एकादशीचविख्यातातस्मिनेसुखवर्द्धनी।रूपेसंपूजयेद्देवंसुदेव्यासतयासह।८४।मु।
चुकुंदैः।सुगंधैःपुष्पैःअर्घंरंभाफलंवरं।नैवेद्यंगुडमपिन्यासुवर्णंदीयतेनघ।८५।एकादशीचविख्यातानाम्नान
प्रदाचकार्तिके।नासेदामोदरंदेवंसहितंराधयासह।८६।पूजयेत्कुंकुमीकाष्ठुपैरर्घंउपमनिफलं।सुगंधैंदि
नैवेद्यंसुखसेव्याप्रदीयते।८७।उमयावासितेपद्मोउपेंद्रंपूजयेत्सुरं।सुगंधयाचसहितंतिलपुष्पैश्चपाउवः।८८
रवुदंउददेद्घंनैवेद्यंगुडसर्पिषी।भूमिदानंचविधिवतविसिष्टकथितोमया।८९।एवंकृत्वातुपश्चात्सर्वंहि
उफलंनवेत।एवंद्वादशवर्षाणिकृत्वासर्वेश्वरंतवा।९०।पश्चाद्युद्यापनंकुर्यात्सुहतीदेतसिद्धये।कार्तिकेमार्ग
शिर्षेचमाघेनोभतीथोत्तया।९१।फाल्गुनीकादशीचैत्रैवैशाखेमधुसूदनी।कर्तव्यंतत्रवाराजनएकादश्यांविव।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं।९४। ततः प्रभातसमये ध्यात्वा चिंतयित्वा समाहितः। स्नानं कृत्वा प्रयत्नेन नद्यादौ विमले जले। ९५। तर्पयित्वा पितॄन्
देवान् पूजयेन्मधुसूदनं। मंडले चोत्तरे कूपे सर्वतोभद्रसंज्ञके। ९६। सौवर्णं कारयेद्देवं लक्ष्म्या सह जगत्पते। देव
मंत्रैः प्रतिष्ठाप्य पूजयेच्च प्रयत्नतः। ९७। ॥ अथ विष्णुपूजामंत्रः ॥ ॥ आगच्छ देव देवेश स्थाने चात्र स्थिरो भव॥
यावत्पूजां करिष्येहं तावत्त्वं संनिधौ भव। ९८। आवाहनं। क्षीरसागरकल्लोलैः स्नानं पापनिषूदन। गंगाजलं
मया दत्तं नवैशाद तेन जलं ब्रवीऽना। ९९। स्नानं। इदमाच्छादनं युग्मं विश्वस्यावरणं प्रभो। लक्ष्म्या सह मया दत्तं गृहा
ण गरुडध्वजः। ९८। वस्त्रमंत्रः। यज्ञे योगे तथा सांख्ये पवित्रस्य सदाच्युत। यज्ञोपवीतदानेन कुंभो सर्वथा वनं। ९
९। उपवीतमंत्रः। चंदनेणाप्यायिनं पुण्यं सुरूपं निश्चय वल्लभं। अत्र चंदनलेपेन प्रीतो भव जनार्दनः। १००। चंदन
मंत्रः। सुमाल्यानि सुगंधानि मालत्यादीनि ते प्रभो। भक्त्या दत्तानि देवेश लक्ष्म्या सह जगत्पते। १०१। पुष्पमंत्रः॥ ॥
मत्स्याय पादयोर्नाभिं कूर्मे देवाय जानुनी। नमाम्युरु वराहाय नृसिंहाय तथा कटिं। २। वामनाय नमो नाभ्यां॥
जामदग्न्याय वक्षसि। उदरस्थे श्रीरामाय रुग्मकंठाय ते नमः। ३। सुरवंते बुधरूपाय श्रां म्लेच्छते कल्कि ते नमः। प्रणवा
द्यैर्नमोतैश्च केशवादिस्वनामभिः। ४। पूजयेत्पुरुषाधीशं लक्ष्माधीशं जनार्दनं लक्ष्म्यै नमः। पद्मायै नमः। हरिप्रिया
यै नमः। कमलायै नमः। इंदिरायै नमः। इति लक्ष्मीपूजा॥ ततः इंद्रादिदिक्पालपूजा। ततः शंखादीन्यायुधानि पूजयेत्॥

ह ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गरुडायनमः। नारदादिगणेभ्यो नमः। ब्राह्मणेवेदमंत्रैश्च पुराणैस्तथेतरैः। पूजयेज्जगतांनाथंसलक्ष्मिगरूडा
सनं॥६॥ वनस्पतिरसोदिव्योगंधाढ्यः सुचिराउतः। धुपोयंदेवदेवेश गृह्णाणसुरपदोभवः॥७॥ धूपमंत्रः। दीपस्तमो
नाशयेतदीपःकांतिप्रयच्छति। तस्माद्दीपः प्रदानेनप्रीयतांमेजनार्दनः॥८॥ इति दीपमंत्रः॥ नैवेद्यमिदमन्नाद्यं
मन्नाज्यसमन्वितं। निवेदयामितुभ्यंर्थ प्रीयतांमेजगन्नाति।९। नैवेद्यमंत्रः॥ संसारार्णवकल्लोलैर्व्याकुलेलोत
मानसं। पापपंकेनिमग्नंतं तारायस्वनमोस्तुते।१०। अर्घमंत्रः। नागवल्लीदलैरम्यः पुगीफलसमन्वितं। कर्पूरेणस
मास्थातंनांबूलंप्रतिगृह्यतां।११। तांबूलमंत्रः। सर्ववाद्यमयीघंटादेवदेवस्यवल्लभा। तस्मात्सर्वप्रयत्नेनघंटा
नादंचकारयेत्ते।१२। घंटामंत्रः। आरात्रिकमिदंदेवजगद्युद्योतकारक। कर्पूरादिसमोपेतंकरोमिशरणंभव॥१३
आरात्रिकमंत्रः॥ गंगाजलंसमानीतं सुवर्णकलशोधृतं। आचमनंमयादत्तंप्रीत्यर्थप्रतिगृह्यतां॥१४॥ आचमनमंत्रः
अनेकजन्मजनितंपापराशिविनाशनं॥ नमामिविष्णुंविश्वेशंजलहमासहसुरोत्तम।१५। नमस्कारमंत्र। गोविंदजग
तांनाथपुराणपुरुषोत्तमः॥ प्रदक्षिणामयादत्तासर्वपापक्षयंकुरु।१६। प्रदक्षिणमंत्रः॥ रात्रौजागरणंकृत्वासर्व
पापैःप्रमुच्यते॥ मनसास्मरन्देवं शंखचक्रगदाधरं॥१७॥ ततःप्रभातसमयेस्नात्वासंपूज्यदेवतां। आमंत्र्य।
ब्राह्मणान्श्रेष्ठान्विद्याव्रतकुलान्वितान्। १८। चतुर्विंशतिसंख्याकान्तपःशीलगुणान्वितान्। सर्वक्रियाविधि
नेन:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

सर्वंकुर्याद्विधानेनजपहोमार्चनादिषु।१९। इदंविष्णुरितिमंत्रेणहोमंचकारयेद्विजः। शूद्राणामपिचात्येषांम
त्रस्याद्वादशाक्षरः।२०। शय्यापदंचगोदानंदपतिद्वादशीवस्तु। अन्यानिसर्वदानानियथाशक्त्यानिवेदयेत्
चतुर्विंशतिवैकुंभाः सरत्नादिपसंयुताः। चतुर्विंशतिविप्राश्चभोजयेच्चस्वशक्तितः। एवंकृतमहीपाल।
नियमंचविवर्जयेत्। विष्णोःसंतोषणार्थायमयानियमाःकृताः।२३। तान्द्वादशमोचयिष्येहंतवचश्रीजनार्दनः
इतिनियमानांचप्रवर्तेहिनिवर्त्तनं।२४। अस्तुमेत्वनाधीशसंपूर्णफलहेतवे। जानताजानतावापियत्क
तंतवसन्निधौ।२५। नियमविसर्जनं। सर्वोपहारान्संसृष्टान्ब्राह्मणायनिवेदयेत्। संतोष्यवैभवान्विप्रान्
इष्टबंधुजनैःसह।२६। स्वयंचपारणंकुर्यात्द्वादशीनैवलंघयेत्। तुलसीछेदनंचैवनकुर्याद्वादशीदिने।
तुलसीदलसंयुक्तंपारणेचरणेदकं। धारयेत्भोजनात्सर्वंमनोवाक्कायसंयुतः।२ जगत्त्वंचमहाराजपाल
यत्वंस्वकांपुरीं। कुरुश्चविधिनासर्वमेकादश्याव्रतंशुभं।२९। श्रीमार्कंडेयउ। एकादशीव्रतमिदमुद्यापनविधि
स्तव। यःपुरायोवनाश्चस्यकथितःसोद्यवैमया।३०। लोकानांउहितार्थायतवमत्वायुधिष्ठिरः। यःकरोति
नरोभक्त्याविष्णुलोकंसगच्छति।३१। येचशृण्वंतिनृपालकथ्यमानामिदंव्रतं। सर्वपापविनिर्मुक्ताःसर्वेयांतिन
संशयः। राज्यार्थिलभतेराज्यंधनार्थिलभतेधनं। पुत्रार्थिलभतेपुत्रान्एतद्व्रतप्रभावतः।३३। सर्वतीर्थेषु

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्पुण्यं सर्वदानेषु यत्फलं। तत्फलं समवाप्नोति व्रतकर्त्ता युधिष्ठिरः॥३४॥एतत्ते सर्वमाख्यातं पवित्रं घादशी
व्रतं। यः करोति नरो भक्त्या विष्णुलोकं स गच्छति॥३५॥ ॥इति श्री भविष्योत्तरपुराणे श्री कृष्णयुधिष्ठिरसंवादे भ्र
मरैकादशी व्रतं॥ ॥युधिष्ठिर उ०॥ वंदे विष्णुं विभुं साक्षाल्लोकत्रयसुखावहं। विश्वेशं विश्वकर्त्तारं पुरा
णं पुरुषोत्तमं॥१॥ किंचित्पृच्छाम्यहं देव संशयोस्ति महान्मम। लोकानां च हितार्थाय पापानां क्षयहेतवे॥२॥ मा
र्गशीर्षे सितपक्षे घादशी चैव कामनेवेत। किं नाम को विधिस्तस्याः को देवः स्तत्र पूज्यते॥३॥ एतदाचक्ष्व मे स्वामिन्वि
स्तरेण यथातथं। श्रीभगवानुवाच॥ साधु पृष्टं त्वया राजन्साधु ते विमलं यशः॥४॥ कथयिष्यामि राजेंद्र हरिवासरमु
त्तमं। उत्पन्ना वासितपक्षे घादशी मम वल्लभाः। मार्गमासस्य उत्पत्तिर्मम देहात्समुद्भवा॥ पुरासुरवधार्थाय उत्पन्ना
जनवल्लभाः॥६॥ कथिता च मया सा वैतवाग्रे राजसत्तमः। सर्वमेकादशी राजंस्त्रैलोक्ये सचराचरे॥७॥ मार्गशीर्षे
सितपक्षे उत्पत्तिरिति नामतः। अतः परं प्रवक्ष्याभि मार्गशीर्षसितां शुभां॥८॥ यस्याः श्रवणमात्रेण वाजिपेयफलं
लभेत्। जयति नाम सा प्रोक्ता सर्वपापहरा परा॥९॥ देवदामोदरं चैव पूजयेत प्रयत्नतः। तुलस्या मंजरीभिश्च धूपै
र्दीपैश्च यत्नतः॥१०॥ पूर्वेण विधिना राजन्दशम्येकादशी तथा॥ मोक्षैकादशी नाम्नी च महापातकनाशिनी॥११॥ कां
स्यं मांसं मसूरांश्च चणकान्कोद्रवांस्तथा। शाकं मधु परान्नं च। पुनर्भोजनमैथुनं॥१२॥ दशम्यां दशवस्तूनि वर्जयेन्नप
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिवर्जयेत्॥ श्री कालउ॥ शृणु राजेन्द्र वक्ष्यामि कथां पौराणिकीं शुभां॥ २३॥ अघोद्योनिगताः सर्वे पितृमातृसुतास्त
था॥ अस्याः पुण्यप्रदानेन स्वर्गं यांति न संशयः॥ २४॥ एतस्मात्कारणाद्दस्या महिमानं शृणु नृप॥ पुरा उत्तनगरे रम्ये
लौकिके न्यवसन्नृप॥ २५॥ वैखानसेति राजर्षि पुत्रवत्पालयन्प्रजा॥ द्विजाश्चन्यवसंस्तत्र चतुर्वेदपरायणाः॥
रुद्धिमंत प्रजास्तस्य वैखानसस्य महात्मनः॥ एवं स राज्यं कुर्वाणो रात्रौ उ स्वप्न मध्यतः॥ ७॥ ददर्श जनकं स्वं त्वत्र
घोद्योनिगतं नृपः॥ एवं दृष्ट्वा तथा तं तु विस्मयोत्फुल्ललोचनः॥ १८॥ कथयामास दृष्टां तं द्विजाग्रे स्वप्नसंभवं॥ राजोउ॥
मया उ स्वपिता दृष्टो नरके घोघगतो द्विजाः॥ १९॥ तारयस्वेति मां तात अघोद्योनिगतासुतः॥ इति ब्रुवाणः सतदाम
या दृष्टः पितास्वयं॥ २०॥ तदाप्रभृति नो विप्रा नांगे शर्म लभाम्यहं॥ एतद्राज्यं मम महद्दुस्सहं मम सुखं तथा॥ २१॥ अ
श्वारथा गजाः कोशा न वित्तसुखदा मम॥ न दारा न सुता नाम भैरान्चते द्विजसत्तमः॥ २२॥ किं करोमि क्व गच्छामि शरीरं
मतिं दु धमे॥ तद्व्रतं तु तपोयोगं कथयंतु द्विजोत्तमः॥ २३॥ हतंत नये न जनक स जति लनते ततः॥ किं ते न जिविते
लोके॥ सपुत्रेण बलीयसा॥ २४॥ पितावयस्य नरके तस्य जन्म निरर्थकं॥ श्री ब्राह्मणाऊ॥ पर्वतस्य मुनेरत्र आश्रमोति
के टे नृप॥ २५॥ गम्यतां राजशार्दूल भूतं भव्यं विजानतः॥ तेषां श्रुत्वा ततो वाक्यं वैखानो राजसत्तमः॥ जगाम तत्र य
त्रास्ते आश्रमे पर्वतो मुनि॥ ब्राह्मणैः वेष्टितः सर्वो प्रजाभिश्च समंततः॥ २७॥ आश्रमो विपुलस्तस्य मुनिभिः सनि
षेवितः॥

६

ऋग्वेदाथर्वणयजुः सामाध्ययनको विदः ॥२५॥ वेदज्ञो मुनिभिस्तत्रविनीय स्वपत्रजः । दृष्ट्वातं मुनिशार्दूलं ।
राजा वेधानसस्तदा ॥२९॥ जगाम त्रय वनिवृक्षादं उवत्प्रणेनाम च पाप प्रच्छ कुशलं तस्य स तस्य गेषसो मुनिः ॥२०
राज्ये निःकंटकं ध्वरासो रश्यसमन्वितः ॥राजाउ॥ तव प्रसादा द्रव्यो स्वामिन् कुशले मे गसं शके ॥२१॥ नवनां
थधनुकुलकथं तेषपि विघ्नता ॥ मयास्व प्रेस्व यंदृष्टो जन को दुर्गतिगतः ॥२२॥ केनापि व्रत दानेन मो हस्त
स्य व्रतवत्ततः ॥एतन्मे शस नग व न दृष्टु त्वाद मुपागतः । एतच्छुत्वा नृप वचपर्वतो मुनिसत्तमः । ध्यानस्तिमि
तनेत्रोसौ मुतं तत्र व्यंव्य चितयन् ॥मुहूर्तमेकं ध्यात्वा सच्चत्तवा च नृपोत्तमः ॥ जानेहं तव राजेंद्र पितु पाप विक
र्मणः ॥२४॥ मुनिरुवाच ॥ पुरापित्रा तव नृपसपत्नि द्वेष दोषतः । कामासक्तेन एकस्या शत्रु नंगकृतस्त्रियाः ॥
त्रात्रिदेहि तिजलं त्या रुद्ध दानेन नराधिपः । तेनैवं तव पित्रा तु नदत्तं रुद्ध दानकं ॥२७॥ कर्मणा तेन पापेन न
रके पतितो पिदं । राजाउ ॥ केनैव व्रत दानेन मोहस्तस्य न वेत्तुने ॥३०॥ निरयापापसंस्थाना तन्मे माहृपदृष्टतः
मुनिरुवाच ॥ मार्गशीर्षे सितपक्षे पक्षरे रे काद शी प्रिया ॥३९॥ जयंति नाम विख्याता सर्व पाप प्रणाशनि । केशवं स्था
पयेद्दैवं विशाखान्वासमन्वितं ॥४०॥ पूजयेन्मालतिपुष्पे नैवेद्ये मोदकामताः ॥ नारिगेन च देदर्घं सतथा नाप्र
दीयते ॥४१॥ सर्वैस्तुत घृतं कृत्वा पित्रे पुण्यं प्रदीयते । तस्याः पुण्य प्रभावेन मो हस्तस्य न विष्यति ॥४२॥ मुनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यं ततः श्रुत्वा नृपस्त्वरित आगतः ॥ आयाहा पणिकः कृत्वा प्राप्तो भरतसत्तमः ॥ अतः पुरचरैः सर्वैः पुत्रदा
रेस्तदा नृप ॥ व्रतं कृत्वा विधानेन पुण्यदं तं नृपायतत् ॥ ४४ ॥ तस्मिन्दत्ते तदा पुण्ये पुष्पवर्षमभूद्दिवि ॥
वेषानस्य पिता तत्र गतः स्वर्गं सुतो गणैः ॥ ४५ ॥ राजानमतरिहाव विमलागीरमापतः ॥ स्वस्त्यपरस्तु तेन पुत्रस्य
प्रसुत्का स दिवं गतः ॥ ४६ ॥ एवं यः कुरुते राजन्मोहापकादशीं शुभां ॥ तस्य पापक्षयं याति हृतो मोक्षम
वाप्नुयात् ॥ ४७ ॥ नातः परतरा काचिन्मोहदा विमला शुभा ॥ पुण्यसंख्या तु राजेंद्र नाहं जानामि येन कृता ॥ ४८
पठनाच्छ्रवणाच्चास्य वाजिपेयफलं लभेत् ॥ चिंतामणिसमा ह्येषा नृणां मोक्षप्रदायिनी ॥ ४९ ॥ ॥ इति श्री
ब्रह्मांडपुराणे मार्गशीर्षस्य कृष्ण मोहैकादशी माहात्म्यं ॥ १ ॥ ॥ ७ ॥ ॥ युधिष्ठिर उ० ॥ मार्गशीर्षे कृष्णपक्षे त्वेकाद
शीका भवेत्प्रभो ॥ किं नाम को विधिस्तस्याः को देवस्तत्र पूज्यते ॥ १ ॥ एतदाचक्ष्व मे स्वामिन्विस्तरेण जनार्दन ॥
श्रीकृष्ण उ० ॥ कथयिष्यामि राजेंद्र भवतः स्नेहकारणात् ॥ तदाकर्णितं मे राजन् कथं तु निश्चयप्रदहितेणैः ॥ यथा उ
ष्टिर्न वे मर्त्यं एकादश्या व्रतेन वा ॥ २ ॥ कृष्णपक्षे च विख्याता विमलैकादशी भुवि ॥ नृपसेतं कर्षणं देवं सवितं च
स्तु नदयाः ॥ ३ ॥ पूजयेद्विमलैः पुष्पैः शृणु राजन्नगस्तपकैः ॥ रत्ना फलेन चैवार्घ्यं नवे घंगणकास्मृताः ॥ ४ ॥ सुवर्णादि
यतेदानं द्विजेभ्यो नृपसत्तमः ॥ तस्मात्सर्वप्रयत्नेन कर्तव्यो हरिवासरः ॥ ६ ॥ मार्गशीर्षे कृष्णपक्षे एकादश्यां न वे
नृपः ॥

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याश्चैवापि माहात्म्यं शृणुष्वैकाग्रमानस। आदिकाश्चापि या राजन्नेकादश्यो भवंति हि। तासामेवं हि सर्वासां
विकल्पं नैव कारयेत्॥७॥ तथापि त्वं वैकादश्याः शृणु राजन् कथानकं। अतः परं प्रवक्ष्यामि मार्गशीर्षे कृष्ण
पादशी॥८॥ तस्या विधिं नृपः श्रेष्ठ लोकानां हितकाम्यया। मार्गशीर्षे कृष्णपक्षे सफला नाम नामतः॥१०॥ नाराय
णं हि देवस्य पूजयेत्तत्प्रयत्नतः। पूर्वेण विधिना राजन् कर्त्तव्यैकादशी जनैः॥११॥ नागानां च यथा शेषः पक्षिणां
गरुडो यथा। देवानां च यथा विष्णुर्द्विपदां ब्राह्मणो यथा॥१२॥ व्रतानां च तथा राजन् वरा एकादशी तिथिः। तेजनान
रतः श्रेष्ठ ममस्त्वाश्च सर्वदा॥१३॥ हरिवासर संसक्तावर्त्तिते ये जना नृप। सफला नाम या ख्याता तस्याः पुण्यफलं शृणुः
रा
फलैमां पूजयेत्तत्र कालदेशोद्भवैः शुभैः॥१४॥ नालिकेरफलैः शुद्धैस्तथा वै बीजपूरकैः॥१५॥ जंबीरैर्दाडिमैश्चैव त
था पूगफलैरपि। लवंगै विविधैश्चान्यैस्तथैवाम्रादिभिः फलैः॥१६॥ धूपदीपैस्तथा शक्त्या क्रमशः प्रपूजयेत्॥
सफलायां दीपदानं विशेषेण प्रदापयेत्॥१७॥ रात्रौ जागरणं तत्र कर्त्तव्यं च प्रयत्नतः। यावदुन्मिषते नेत्रं।
तावज्जागर्त्ति यो निशि॥१८॥ एकाग्रमनसो भूत्वा तस्य स्यात्पुण्यफलं शृणु॥ तत्समो नास्ति वै यज्ञो तीर्थं तत्सदृशं न
हि॥१९॥ न तत्समं व्रतं किंचिदिह लोके नराधिप। पापं वर्षसहस्राणि तपस्तप्ते न यत्फलं॥२०॥ तत्फलं समवा
प्नोति सफलाजागरणेन च॥ शृणु यत्नान् राजशार्दूल सफलायाः कथानकं॥२१॥ चंपावतीति विख्याता पुरी मा॥

दिष्मतस्य च। मा दिष्मतस्य राजर्षेश्चत्वारस्याभवन्सुताः।२२। तेषां मध्ये ज्येष्ठ स महापापसंयुता। परदाराभिगा
मि च वेश्यासंगरतः सदा।२३। पितृद्रव्यस पापिष्ठो गमयत्येवमन्वहं। असद्वृत्तिरतो नित्यं देवताविजनंदकः।२४
वैष्णवानां च वेदानां नित्यं निंदारतः सदा। इद्दृग्विधं तदा दृष्ट्वा पुत्रं माहिष्मतो नृपः।२५। लुंपकोनाम नाम्ना त्रिति
दुर्लब्धो वानस्य मर्षितः। राज्ञा निष्कासितस्तेन पित्रा चैवापि बंधुभिः।२६। परिवारजनैः सर्वैस्त्यक्तो राजभयाद
पि। लुंपको पितदात्यक्तश्चिंतयामास पंकितः। मया च क्रियते किं वै मतयपापे तदा करोत्। सभया गम्यतेस
म्यक्वनं त्यक्त्वा पुरं पितुः।२७। इत्येवं समतिं कृत्वा लुंपको दैवपातितः। निर्जगाम पुरात्तस्मात् गतसौ गहनं
नवनं।२९। जीवघ्ने परो नित्यं नित्यं स्तेयपरायणः। सर्वं च नगरं तेन राज्यं प्रक्लिष्टः सपापकृत्तदा।३१। आमिषाहार
निरतो नित्यं च फलभक्षकः। आश्रमो तस्य दुष्टस्य वासुदेवस्य संमतः। अश्वत्थस्याभवत्तत्र जीर्णो बहुलवा
र्षिकः। देवत्वं तस्य वृक्षस्य वर्तते तत्र कानने महत्।३३। तत्रैव न्यवसद्यासौ लुंपकः पापबुद्धिमान्। एवं कालक्र ८
मेनैव वसतस्तस्य पापिनः। विकर्मनिरतस्यापि कुर्वतः कर्म निंदितं। मार्गशीर्षे कृष्णपक्षे पर्वणि दैवसम्फलादि
गाता दशमीदिवसे राजन्निशायां शीतपीडितः। निश्चेष्टो लुंपकस्तत्र अश्वत्थस्य समीपतः।३६। न निद्रां न सु
खं तस्य गतप्राणैर्वा भवत्। तत्र तत्र वसन् हि नो सौ शीतेन बहु पीडितः।३७। पीडयन्दशनैर्दंतानेवं सोगमयं
निशां॥

स्तूर्योदयेप्रजातेपीतांलभेच्चेतनांहिसः।३८। लुपकोगतसंज्ञस्तुसफलायादिनेतथा। मध्याह्नसमयेप्राप्तेसज्ञोले
भेथलुंपकः।३९। प्राप्तासंज्ञाततस्तेनउत्थितोसोतदासनात्। संचलितपदन्यासैःक्षीववच्चलतेमुहुः।४०। वनम
ध्येगतश्चैवक्षुधयापीडितस्तथा। नशक्तिर्जीवघातोस्यलुंपकस्यदुरात्मनः।४१। फलानिभूमिपतितान्याजहा
रसलुंपकः। यावत्सत्रागतःस्तत्रेतावदस्तंगतोरविः।४२। किंभविष्यतिनातेतिविललापातिदुःखितः। फला
नितानिसर्वाणिवृक्षमूलेन्यवेदयेत्। इत्युवाचफलैरेभिःप्रीयतांभगवान्हरिः। उपविष्टोलुंपकश्चनलेभे
लेभेनिद्रांतेनिशि।४४। रात्रौजागरणंमौनेभगवान्मधुसूदनः। फलैस्मर्पूजनं मेनेसफलायास्तथा नृप।४५। रुत
मेवंलुंपकेनअकस्माद्व्रतमुत्तमं। तस्यपुण्यप्रभावेनप्राप्तराज्यमकंटकं।४६। पुण्यांकुरोदयाराजन्श्रुयथा।
प्राप्तंतयाशृणु। रवेरुदयवेलायांदिव्योश्वश्चाजगामह।४७। दिव्यवस्तुपरिवारोलुंपकस्यसमीपतः। तस्थौसउ
रगोराजन्वाचवारिरीण।४८। प्राप्नुहिलंनृपसुतस्वराज्यंहतकंटकं। वासुदेवप्रसादेनसफलायाप्रसाद
तः॥ पितुःसमीपंगच्छत्वंभुंक्ष्वराज्यमकंटकं। इत्युक्तासगतस्तत्रदिव्यरूपधरोनृपः।५०। रुद्धिमतिश्चतस्यासत्
परमावैष्णवीतदा। दिव्याभरणभूषाढ्यस्थानेतवस्थितोगृहे।५१। वैष्णवायतदादत्वपात्रराज्यमकटकं। राज्यं
तकारवर्षाणिसहस्त्राणिसषोडशः।५२। हरिवासरसंलीनविष्णुभक्तिरतःसदा। मनोज्ञास्तस्यतत्रासन्दारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यते

पुत्रांश्च विन्यसेत्॥५३॥ ततः सर्वाधिके प्राप्ते राज्यं पुत्रे निवेश्य च। वनं गतः संयतात्मा विष्णुभक्तिपरायणः॥५४॥
साधयित्वा तथात्मानं वैष्णुलोकं जनमर्हति। एवं ये वै करिष्यंति सफलाद्यादशीं जनाः॥५५॥ इह लोके यशः प्राप्य
स्वर्गं यास्यंति वैष्णवाः। धन्यास्ते मानवा लोके सफलाव्रतकारिणः। सफलं जन्म वै तेषां एवमेतन्न संशयः॥५६॥ न
तस्य श्रवणाच्चास्य सफलायाः नृपोत्तम। राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः॥५७॥ ॥इति श्रीगरुड
पुराणे श्रीकृष्णयुधिष्ठिरसंवादे मार्गशीर्षे कृष्णासफला एकादशी माहात्म्यं नाम॥ ॥२॥ छ॥ युधिष्ठिर उ०॥ कथि
तावै त्वया कृष्ण सफलैकादशी शुभा। कथयस्व प्रसादेन शुक्ला पौषस्य या भवेत्॥१॥ किं नामा को विधिःस्तस्याः को
देवः स्तत्र पूज्यते। पौषस्यैकादशी शुक्ला सा नंदा नाम नृपते॥२॥ तस्या मे नारायणं देवं लक्ष्मीसमन्वितं। पूजयेत
पद्मपुष्पैश्च दाडिमं चार्घमुत्तमं॥३॥ चूर्णमुक्तं तु नैवेद्यं घृतपात्रं प्रदीयते॥ युधिष्ठिर उ०॥ कस्मै तुष्टो ऋषिके
शस्त्वमेव पुरुषोत्तमः॥४॥ श्रीकृष्ण उ०॥ शृणु राजन्प्रवक्ष्यामि शुक्ला पौषस्य या भवेत्। कथयामि महाभाग लो
कानां हितकाम्यया॥५॥ इस्त्वैविधिना राजन्कर्तव्यं पापयत्नतः॥ पुत्रदा नाम नाम्नासा सर्वपापक्षणे शांति
द॥ नारायणोधिदेवस्याः कामसाधिप्रदायकः॥ नातः परतरा काचित्त्रैलोक्ये सचराचरे॥७॥ विद्यावंतं यशस्वंतं
करोति च नरं हरिः। शृणु राजन्प्रवक्ष्यामि कथां पापहरां परां॥ ८॥ नन्द्रवत्यां पुरी पुरा त्रासीद्राजा सुकेतुमान्
॥

१९

तस्यराज्ञस्तथाराज्ञीचंपीकानामप्रवर्त्तते।९।पुत्रहीनेनराज्ञाचएकाळोनीतोमनोरथ।नैवात्मजंनृपोळेभेवशक
त्तरिमेवच।ततैवराज्ञाधर्मेणचिंतितंबहुकालतः।कीकरोमीक्वगच्छामी।सुतप्राप्तिकंभवेत्।नराष्ट्रेनपु
रेभौरव्येकुळेनराजासुकेतुमान्।सततयाकांततयासाकंभूपःदुःखितोभवेत्।१२।नाबुभोदंपतिनात्यंचिताशो
कपरायणे।पीतरोस्यजळंदत्तंकेवोळमनुपमुंजते।१३।राज्ञापश्चान्नयस्यामियोस्माकंतर्पयिष्यति।इत्येवंसस्म
रंतस्यपीतरोदुःखीतोन्नवेत्।१४।नवांधवानमीत्राणिनामात्यसुहृदस्तथा।नराश्चयंतिभूपस्यनगजीश्वापदातरा।१५
नेरास्यानृपतेःस्तस्यनित्यंमनसिवर्त्तते।नरस्यपुत्रहीनस्यनास्तिवैजन्मनःफलं।१६।अपुत्रस्यगृहंशून्यंहृद
यंदुःखितंसदा।पितृदेवमनुष्याणांनानृणत्वंसुतंविना।१७।तस्मात्सर्वप्रयत्नेनसुतमुत्पादयेन्नरः।इहलो
केयशःस्तेषांपरलोकेसुभांगति।१८।तेषांतुपुण्यकर्तृणांपुत्रजन्मगृहेभवेत्।आयुरारोग्यसंपत्तिस्तेषांगृ
हेप्रवर्त्तते।१९।पुत्रजन्मनवेद्येषांलोकानांपुण्यकारिणं।पुण्यंविनानचप्राप्तिविघ्नभक्तिंविनातथा।२०।पुत्र
स्यसंपदोवापिविद्यायामितिमेमति।एवंचिंतयमानोसौनशर्मळभतेनृपः।२१।प्रातःपश्चात्स्वालयेराजानिशीथेचिंत
यततः।स्वयमात्मविनाशंचचिंतयामासकेतुमान्।२३।आत्मघातेदुर्गतिंचवेचयित्वातदानृपः।दुःखात्मदे
हपलितामपुत्रत्वंतथैवच।२४।पुनःपुनःविचार्याथी।आत्मनोहीतकारणे।अश्वारुढस्ततोराजाजगामगह
नेवनं।२५॥

घं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरोहितादयः सर्वे नृजानंतिगतं नृपं ॥ गंगिरे विपिने राजा मृगपक्षीगणान्विते ॥२४॥ विचचार तदा राजा वने हृष्टा
स्वविलोकयन् वटनश्वत्थ विल्वांश्च खर्जूरान् पनसांस्तथा ॥२६॥ बकुलान्सप्तपर्णांश्च तिंदुकान् सिल्लकांनपि
शालांस्तालांतमालांश्च ददर्श सरलान्नृप ॥२७॥ इंगुदीककुभांश्चैव श्लेष्मांतान्बदरीस्तथा ॥ सज्जकान् करमर्दांश्च पा
टलान्खदिरानपि ॥२८॥ कांसांश्चैव पलाशांश्च शोभितान्ददृशे नृप ॥ मृगव्याघ्रवराहांश्च सिंहान्शशपा
स्गानपि ॥२९॥ गवयान्रुरून्सारांश्च मृगान्शशकानपि ॥ वनमार्जारिकान्दृष्ट्वा न्सल्लकान्द्रुम
रानपि ॥३०॥ ददर्शचुजगान्राजा वल्मीकादंघ्रिनिःसृतान् ॥ तथा वनगतान्मत्तान्कलभैः सहसंगतान् २१
गजयूथांश्च उद्दंतान्करेणुगणमध्यगान् ॥ तान्दृष्ट्वा चिंतयामास आत्मनः सगजान्नृपः ॥३१॥ तेषां स विचरन्वि
मध्ये राजा शोभामवाप्तवान् ॥ महदाश्चर्यसंयुक्तं ददर्श विपिनं नृपः ॥३२॥ तेषां स विचरन्मध्ये एकं विछिं वरू
तान्स एव रुरुतुकं विलोकितांस्तथा ॥ तास्तान्यहिंस मृगानूपरूपान्बभ्रामवनमध्यतो ॥३४॥ एवं ददर्श गहनं ॥ २०
रूपो मध्यगतो रवौ ॥ क्षुत्तृष्णाभिपीडितो राजा श्रांतश्चैव तथैव धावति ॥३५॥ चिंतयामास नृपतिः सम्मुखं गलकंटकः ॥ मया
तु किं कृतं कर्म पापं दुःखं यदीदृशं ॥३६॥ मया वैतो पिता देवाय ज्ञेस्य जामिरेवच ॥ तथैव ब्राह्मणेभ्यो दानेनतोषि
तामिष्टभोजनैः ॥३७॥ प्रजाश्चैव सदाकालं पुत्रवत्परिपालिता ॥ कस्माद्दुःखं मया प्राप्तं ईदृशं दारुणं महत्
३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्चिंतापरो राजा जगामैवाग्रतो वनं। सुकृतस्य प्रभावेन सरोदृष्टमनुत्तमः।३९। मानसं स्पर्द्धयानं च पद्मि
न्यापरिशोभितं। कारंडवैश्चक्रवाकै राजहंसैश्च शोभितं।४०। मकरैर्बकभीमैः सैः रत्नैर्जलचरैर्युतं। मत्स्यैस्तं
मीपसरस्तस्य मुनिनामाश्रमान्बहून्। ददर्श राजा लक्ष्मीवान् शकुनैः सूचितः शुभैः। सिभिः सव्यापसरतरं नेत्रं
मपसव्यस्तथाकरः। प्रस्फुरन्नृपतेस्तस्य कथयन् शोभनं फलं। तस्य तीरे मुनीन्दृष्ट्वा कुर्वाणान्नैगम
जपं।४३। हर्षेण विष्टमनसो मुनीन्दृष्ट्वा समस्थितान्। अवतीर्य हयात्तस्मा दमुनिनामग्रतोपयुः।।४४।।
पृथक्केतान्दावदेमुनिन्सर्वानपि संस्थितान्। वंदे राजा द्रुतं तत्र दत्तवन्तः पुनः।४५। प्रत्युचुस्ते पिमुनयो
प्रसन्नास्मवयं तव। कथयिष्याभिमाराजन्यत्ते मनसि वर्त्तते।४६। राजोवाच। येयूयं मग्रतः प्रत्यक्षीमा रव्याम व
तामपि। किमर्थमागताअत्र कथयंतु मम वाग्यतः।४७। मुनियऊचुः।।विश्वेदेवा वयं राजन्स्नानार्थे आगताः।
त्रैवमाघो निकटमायातो प तस्मोत्पन्नमेकनि।४८। अथ एकादशी राजन्पुत्रदा नाम नामतः। पुत्रं ददाति
सो तस्मात्पुत्रदा कारिणां नृणां।४९। राजोवाच।। एतत्वसंशयो मत्पस्तु तस्य कारणं महत्। यदि तुष्टा भवतो वै पुत्र
धां मादीयतां तस्मा। मुनायकुः।। अद्यैव दिवसो राजन्पुत्रदा नाम वर्त्तते। एकादशीति विख्याता। क्रियतां व्रतमुत्तमं।५१
अस्मिन्विके कृते स्माक रूपस्य वप्रसादतः। अवश्यं लं प्रवराजेंद्र पुत्रं चैव भविष्यति।५२। इत्येवं वचनात्तेषां।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ कारितं व्रतमुत्तमं। मुनिनां वचनेनैव पुत्रदाया प्रसादतः॥५३॥ द्वादश्यां पारणं कृत्वा मुनिन्नत्वा पुनः२।
आजगाम गृहं पश्चाद्राज्ञी गर्भं समादधौ।५४। जातं पुत्रं उत तत्रैव तेजसंतमतं दृढं। पितरं तोषयामास प्र।
जापालो बभुव स।५५। एतस्मात्कारणाद्राजन्न कर्तव्यं पुत्रदाव्रतं। लोकानां तु हितार्थाय तवाग्रे कथितं म
या।५६। एकचित्तास्तु ये कुर्यात्किर्वंति पुत्रदाव्रतं। तेषां चैव भवेत्पुत्रं अवश्यं स्वर्गगामिनी।५७। पठना
श्रवणाद्राजन्नग्निष्टोमफलं लभेत्॥ ॥इति श्री ब्रह्मवैवर्तपुराणे श्रीकृष्णयुधिष्ठिरसंवादे पौषशु
क्लापुत्रदायिमाहात्म्य नाम॥३॥ ॥छ॥ युधिष्ठिर उवाच॥ भगवन्देवदेवेश सृष्टिकर्तमिमं प्रियः। पौषस्य
कृष्णपक्षे तु एकादशी उच्यते।१। श्रीकृष्ण उवाच॥ शृणु राजेन्द्र प्रवक्ष्यामि पौषे कृष्णा च या भवेत्। पुरा
तु वायु रुद्रे शार्ले सनकाद्या ऋषिस्तथा।२। ऋषिभिर्वाचा च स्वामिन् शङ्खलमारव्या दि पापघ्नं पुण्यवर्द्धनं।
यत्कृत्वा मानवो भक्त्या सर्वपापैः प्रमुच्यते। विष्णुलोकं तथा स्वयं।३। वायुरुवाच। शृणु ब्रह्मन् व्रतं पुण्यं स ११
र्वपापप्रणाशकं। यः कृत्वा मानवो भक्त्या सर्वपापैः प्रमुच्यते।४। कल्याणं कृष्णपक्षे तु नृपसे देवं हरिं तं
सहितं श्री प्रिययाचक्रकारेण प्रपूजयेत्। पाद्यं दद्यात् घृतं धूपं गंधं नैवेद्यं घेवरं करं। दानानि दियते वस्त्रादि
जेम्नो नृपपुंगवः।६। वायुरुवाच॥ मर्त्यलोके मनुष्याणां पापं कुर्वंति जनवः। ब्रह्महत्यादिपापेभ्यो मन्यथा
श्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विविधादिभिः ।७। परद्रव्यापहाराश्च परव्यसनमोहिताः। कथं नगच्छेन्नरकान्ब्रह्मन्रक्ष हितत्वतः। ८। अल्पा
यासेन नगवान्दानेनाजेनकेनचित्। पापप्रशमनं याति येनतद्वदकेशवः। ९। गमस्त्यउ। साधुसाधुमहा
भागत्वत्वामितद्वदामिते। यन्नकस्यचिदाख्यातंब्रह्मविधिंद्देवतैः। १०। तदहंकथयिष्यामि त्वयाद्रष्टोद्विजोत्तमः
पौषमाघेतुसप्राप्तेस्नेविस्नातोजितेंद्रियः। १२। कामंक्रोधंमहंकारंलोभंपेसुन्यवर्जितः। देवदेवंचसंस्मृत्यपा
दौप्रक्षाल्यवारिणा। १३। भुमावपतितंग्राह्यंगोमयंतत्रमानवः। तिलाद्यवहितिप्पकर्पासंपिंडिकांचैवकास्येत्। १३
पौषेवाप्यथवामाघेमकरस्थेदिवाकरे। उपवासंचवैःकुर्याद्दिस्जनच्चजगत्पते। १५। स्नानंचैवतिलैःकुर्यात्तै
र्पणंचतिलैःस्तथाः। होमंचैवतिलैःकुर्याद्दानंदेयात्तिलैःसमं। १६। अष्टोत्तरशतंचैवनात्रकार्याविचारणात्
ततोमाघेवसप्राप्तेश्राद्देनैवनवेयदि। ७। मृद्बवाकेपिपहस्रैकादरूपानियमेततः। १८। सूर्यात्गुणफलंद्म
विधानंतत्रमेश्रृणु। १८। देवदेवसमभ्यर्च्यसुस्नातःप्रयतःशुचिः। कृष्णनामंचवसंकीर्त्यंकृतःआणायमादिषु।
रात्रौजागरणंकार्यंरात्रौहोमंचकारयेत्। अर्चयेद्देवदेवेशंशंखचक्रगदाधरं। २०। चंदनागरूकर्पूरैः नैवेद्यंधू
पंतथा। संस्मृत्यनाम्नाचततःकृष्णाख्येनपुनः। २। कूष्मांडेनालिकेरैश्चअथवाबीजपूरकैः। सर्वाभावेपिविप्रें
द्रपादशापूवराहकपातिलदाहितिसाश्रुता। २४। तस्मात्स्नानंचकर्तव्यंमनुष्येणशुचिस्मिता। २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जंगमास्तांबुगीफलास्तथा॥२२॥ अर्घं दद्याद्विधानेन पूजयित्वा जनार्दनं। कृष्ण कृष्ण कृपालुस्त्वं अगतीनां गतिर्भव॥२३
संसारार्णवमग्नानां प्रसीद पुरुषोत्तम॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन॥२४॥ सुब्रह्मण्य नमस्तेस्तु
महापुरुष पूर्वज॥ येदाणार्घ मयादत्तं लक्ष्म्या सह जगत्पते॥२५॥ अर्घमंत्रः॥ ततः संपूजयेद्विप्रमुदकुंभं प्रदी
यते। छत्रोपानह वस्त्रैश्च कृष्णो मे प्रीयतामिति॥२६॥ कृष्णा धेनुः प्रदातव्या यथाशक्त्या द्विजोत्तमे। तिलपात्रं द्विज
श्रेष्ठ दद्यात्तत्र विचक्षणः॥२७॥ स्नान प्राशन शस्तास्तथा कृष्ण तिला मुने। तिल प्रदो हि जायंते यथासंख्या ति
ला द्विजः॥२८॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते। तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी॥२९॥
तिलदाता च भोक्ता च षट् तिला पापनाशन॥ नारद उ॰॥ एतदेकादशी देव कीदृश फलमश्नुते॥३०॥ सोपा
ख्यानं मम ब्रूहि यदि तुष्टोसि यादव॥ श्रीकृष्ण उ॰॥ शृणु ब्रह्मन् यथा वृत्तं दृष्टांतं कथयामि ते॥३१॥ मृत्यु
लोके पुराप्यासीद्ब्राह्मणी तत्र नारद॥ ब्रह्मचर्यरता नित्यं देवपूजारता सदा॥३२॥ मासोपवासनिरता मम भ १२
क्ता च सर्वदा॥ कृतोपवाससंयुक्ता मम पूजापरायणा॥३३॥ शरीरं क्लेशितं चैव उपवासे द्विजोत्तमः॥ देवानां
ब्राह्मणानां च कुमारीणां च भक्तितः॥३४॥ गृहाणि ग्रामसंगच्छति सर्वकालं महामति। मति कृष्णेरता शा च सर्व
कालं तु वै द्विजः॥३५॥ दत्ता तु भिक्षुके निःसा ब्रह्मण्येव तत्पतिं॥ ततः कालेन महता मया वै चिंतितं द्विजः॥

३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्दरपां पारणं तेनऋषडंव्रतमुच्यते।१४॥ एवंमासचतुष्केपिअखंडैकादशी ल्कृता। अषंडफलमाप्नोतिस्वर्गेमोक्षो।
दिवांछितं।१५॥रात्रौजागरणं कार्यंगीतवादित्रहृजनं। मासाधिपं यजेदेवं पुष्पैर्धूपैर्मनोहरैः॥ सप्तधान्यमयेगेहे
दीपंकार्योमनोहरः॥ कथामेतांहरेःश्रुत्वासर्वपापैःप्रमुच्यते।१७। एवंव्रतंविधातव्यंमासाधादशसुव्रत। उद्या
पनंततःकार्यंव्रतसंपूर्णहेतवे। दशम्यामुद्दानेब्राह्मणेतीर्थयात्रान्मनोहरं। स्नानार्थस्वस्तिकंतत्रसर्वैर्येदस्तातः
ध्मनैः। अखंडुनिर्मलंवस्त्रपरिधायत्रतायवै। आरुह्य ब्राह्मणान्तत्रचत्वारःस्वस्तिवाचकान्।२०। तेषांवच
नतःस्नात्वापितृन्संतर्प्यदेवतान्॥ फलाहारीभवेत्तस्मादृशम्यांभक्तितत्परः।२१। एकादश्यांनिराहारोरात्रौम
डलमुद्धरेत्। सर्वतोभद्रसंज्ञंतमंडलेसुमनोहरे॥२२॥ सुवर्णवासुदेवस्यमूर्त्तिंकुर्वीतसुंदरां। फलानिनाना
देयानिदीपंकार्याश्चिनेकशः॥ जलेहर्षेनवेकुंभेदेवंगोविंदसुंदरं॥ पूजयेद्विविधैःपुष्पैर्नैवेद्यैर्जैर्य
थाक्रमं।२४॥ षोडशोपचारैःपूजापित्संजयित्वाहरिंविभुं। अर्घोदेयोमहाराजभक्तियुक्तेनचेतसा॥ संसारार्णवमग्नं
मांसमुद्धरगदाधर॥ पापंहरजगन्नाथअर्घोयंप्रतिगृह्यतां॥२५॥ अर्घमंत्रः॥ चंद्रसूर्याग्निनेत्रात्मातत्वंतेज
रुपनाक। दीपवक्षवदेहत्वंदीपंगृह्णनमोस्तुते।२६। त्वन्माययासिलमिदंव्याप्तिंसचराचरं। धूपदानेनदेवेश
प्रीयतांपुरुषोत्तम।२७॥ अनंतकालनामायेविश्वसंभ्रमतेविभो। रुपंतेजगदाधारंनैवेद्यंप्रतिगृह्यतां।२८। नैवे।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घमंत्रः॥ अर्घं यित्वा कपिकेशांगीतवादित्रनिस्वनैः॥ पुराणपठनैरात्रौ कार्यं जागरणं मुने॥३०॥ प्रभाते वैष्णवं होमं।
ब्राह्मणेन तु कारयेत्॥ यथावित्तानुसारेण दानं देयं पृथक् पृथक्॥३१॥ शय्यासोपस्करा कार्या अष्टदानानि यानि
च॥ अष्टांगपदमुद्दिष्टं सवत्सा धेनुरुत्तमा॥३२॥ सप्तधान्यानि राजेंद्र मामाहेश्वरं त्रयं। तिलपात्रं घृतपात्रं यथावि
त्तवसारतः॥३३॥ गोऽप्यास्ते ब्राह्मणस्तत्र वस्त्र विंशति संख्यया॥ यथावित्तानुसारेण स्तोकं स्तोकं तु कारयेत्॥३४॥
एवं कृते महीनाथ नरकं नैव पश्यति। अखंडा रजनी तेनोका न ये मुनीनां च दुर्लभा॥३५॥ अद्य जन्मनि भूपाल॥
यत् यत् षंड कृतं कृतं॥ सर्वं तत्पूर्णतां याति व्रतस्यास्य प्रभावतः॥ अर्घं च पसिचानारि वैधव्यं लभते किल॥ मृय
ते तनयायस्य पुत्रवान पि विपद्यते॥३७॥ पिता माता तथा भ्राता अर्थैर्मरणमानुयात्॥ लभते सो गणसत्किर्ति।
रर्थं यस्य विलीयते॥३८॥ तेनाषंडितविख्याता उन्नयेकादशी स्मृता। कर्तव्या न क्रियुक्तेन अखंड फलदायिनि॥
३९॥ अखंडं सौख्यमाप्नोति स्वर्गं वा षडमेव च॥ मुक्तिं वा खंडमाप्नोति एकादश्याः प्रभावतः॥४०॥ सर्वतीर्थेषु य
त्पुण्यं सर्वदानेषु यत्फलं सर्वं तत्सर्वमाप्नोति उन्नयाव्रतशीलनात्॥४१॥ नृयोपि नृप किमपि स्थाणुपांडपयलत्तः॥
उन्नयेकादशीतल्पं व्रतं कुर्वन दृश्यते॥४२॥ अपुत्राः पुत्रिणः संतु पौत्रिणः संतु पौत्रिणः। निर्धनाः सधनाः संतु जीवं
तु शरदां शतं॥४३॥ ॥इति पद्मपुराणे श्रीकृष्णयुधिष्ठिरसंवादे उन्नयाएकादशीव्रतं संपूर्णं समाप्तं॥ ॥छ॥

५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२

॥ ॥अथउद्यानविधिः॥ ॥श्रीफल२ कुंकुमटाक५ गेवासुत्रटांक५ फोफल२७ षारकटाक५ टोपरूटांक
५॥सर्वौषधि। कमलकाकडिटंक२॥ साकर टांक२॥ डाषचारोलीटाक२॥ अबिलगुलाल॥ गुगलटांक२॥
वाति। षाडशे॰। पा॰। पांन२१। कर्पूर। सरसव॥ टाक२॥ रातुकापडुगज१॥ धोतुकापडुगज॰१॥ धोतीयां६॥
पोतियां६। कुंभः ३१। कउसलीप५ त्रैभाणि५। मुखावलोकन। घृतपात्र। तिलपात्र। पट्ट। चोषाशेर३। जवतिल
सेर२॥ मडलशेर६४ अउदशेर ४ अरदालशेर२॥ मगशेर२ गोलार२ मसुरनीदालशेर१। चोषाशे
र१॥ गउशेर७॥ जारशेर५०॥ घीशेर१। पातरि॰। गुरूतं सुवर्ण निरूपानि॰। लक्ष्मीनाराएण। केतां२ शेरडी
फल७ नासनो होमनो॥ उमामाहेश्वर। ७। उपवीत२४॥ पाटला॰७ शय्या॥ ॥गाय॥ देहशुद्धिप्रायश्चितः॥ ब्रा
ह्मणभोजनं॥ २०८॥ ॥सापालिक॥ दक्षिणा। ॥इतिउद्यापनसमाप्तं॥ छ॥ ॥छ॥ ॥सवत१८२५ वर्षेशाके१६
९१ प्रवर्त्तमाने माघशुदी९ रवौ लिखितोयं ग्रंथः॥ संपूर्णंसमाप्तः॥ ॥छ॥ लेखकपाठयोशुभंभवतुः॥ ॥

५२

॥हरितकी हरीश्चैव गायत्रीच पुनः पुनः॥ अंते मलविनाशाय ब्राह्मणस्मरणं कृपालः॥ १॥ ॥छ॥ ॥छः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=12.08.20 14:09
,TRANSFERRED=2020/08/12 at 14:14:30
,PAGES=29
,TYPE=STD
,NAME=S0003482
,Book Name=M-2616-YEKADASHI MAHATAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection